1833

The Compendium of the Amorous Arts - Ratimañjari of Jayadeva

PAPER - 8FF - 99 X 239 MM - JAIPUR - 1884 AD - IN SANSKRIT

Native paper 99 times 239 mm in pothī format, complete in 8 folios, 6 lines a folio, c. 32 syllables a line, Sanskrit in Devanāgarī calligraphy in black ink, rubrication with orange kuṅkuma, folio-numbers in margin, copied in Jaipur in saṃvat 1941 = 1884 A.D. by the scribe Māṅgīlālā Śarmā.

The Ratimañjarī, 'The compendium of the amorous arts', is a concise statement in 60 explicitly detailed verses of the fundamental practices of the Kāmaśāstra. Jayadeva discusses the four types of woman, the lotus-woman, the shining-woman, the conch-woman and the elephant-woman, and the four male types, the hare-man, deer-man, bull-man and horse-man, and the auspicious and inauspicious pairings between the different types. He proceeds to discuss sexual practices which are suitable for people of different ages and for women at different times of the lunar month, with which their menstrual cycle is supposed to synchronise.

॥ अथ रतिमंजरी प्रारंभः पत्र ८।

श्रीः ॥श्रीगणेशायनमः॥ नत्वासदाशिवंदेवंनागराणांमनोहरं रचिताजयदेवेनसु।
१ बोधारतिमंजरी १ रतिशास्त्रंकामशास्त्रंतस्यसारंसमाहृतम् सुप्रबंधंसुसंक्षिप्तंज
यदेवेनभण्यते २ पद्मिनीचित्रिणीचैव शंखिनीहस्तिनीतथा शशोमृगोवृषो।
श्वश्चस्त्रीपुंसोर्जातिलक्षणम् ३ भवतिकमलनेत्रानासिकाक्षुद्ररंध्राऽविरलकु
चयुगमाचारुकेशीकृशांगी मृदुवचनसुशीलागीतवाद्यानुरक्तासकलतनुसुवे।
शापद्मिनीपद्मगंधा ४ भवतिरतिरसज्ञानातिखर्वानदीर्घातिलकुसुमसुनासा १

स्निग्धनीलोत्पलाक्षी घनकठिनकुचाढ्यासुंदरीबद्धशीलासकलगुणसमेताचित्रि
णीचित्रवक्त्रा ५ दीर्घातिदीर्घनयनावरसुंदरीयाकामोपभोगरसिकागुणशीलयुक्तारे
खात्रयेणचविभूषितकंठदेशासंभोगकेलिरसिकाकिलशंखिनीसा ६ स्थूलाधरास्थू
लनितंबभागास्थूलांगुलीस्थूलकुचासुशीला कामोत्सुकागाढरतिप्रियायानितां।
तभोक्त्रीकरिणीमतासा ७ शशकेपद्मिनीतुष्टाचित्रिणीरमतेमृगम् वृषभेशंखिनी
तुष्टाहस्तिनीरमतेहयम् ८ पद्मिनीपद्मगंधाचमीनगंधाचचित्रिणी शंखिनीक्षा

श्री:
२

रगंधाच्चमदगंधाचहस्तिनी ९ बालाच्चतरुणीप्रौढावृद्धाभवतिनायका गुणयो
गेनरंतव्यानारीवश्याभवेत्तदा १० आषोडशाद्भवेद्बालातरुणीत्रिंशकामता।
पंचपंचाशकाप्रौढाभवेद्वृद्धाततः परम् ११ फलमूलादिभिर्बालातरुणीरति
योगतः प्रेमदानादिभिः प्रौढावृद्धाच्चदृढताडनात् १२ बालातुप्राणदाप्रो।
क्तातरुणीप्राणहारिणी प्रौढाकरोतिवृद्धत्वंवृद्धातुमरणंदिशेत् १३ अंगु
ष्ठेचरणेचगुल्फनिलयेजानुद्वयेबास्तिकेनाभौवक्षसिकक्षयोर्निगदिताकं

२

ठेकपोलेधरे नेत्रेकर्णयुगेललाटफलकेमौलौच्चवामभ्रुवामूर्ध्वोधश्चलनक्र
मेणकथिताचांद्रीकलापक्षयोः १४ सीमंतेनयनेधरेच्चगलकेवक्षस्तटेच्चचुके।
नाभौश्रोणितटेमनोभवगृहेजानौच्चजंघातटे गुल्फेपादतलेतदंगुलितलेंगुष्ठे
चतिष्ठत्यसौवद्धिक्षीणतयासमंशशिकलापक्षद्वयेयोषिताम् १५ शुक्ल[redacted]
पक्षेवसेद्वामेपादांगुलिकनिष्ठके शुक्लप्रतिपदादौच्चकृष्णेचाधः प्रलंवते
१६ पुंसः सव्येस्त्रियोवामे शुक्लेकृष्णेविसर्पयेत्: एतानिकामस्थानानिज्ञेयानि।

श्री: नागरैःसदा १७ बलयुक्तायदानारीविपरीतरतिर्भवेत् संचाल्यतुकलास्थानं
३ रंतव्याकामिनीतदा १८ नेत्रेकंठेकपोलेच्चहृदिपार्श्वद्वयेपिच ग्रीवायांनाभि
देशेच्चकामीचुंबतिकामिनीम् १९ मुखेजंघेनितंबेच जघनेमदनालये स्तन
युग्मेसदाप्रीतिः कामीचुंबतिकामिनीम् २० प्रेम्णास्त्रियंसमालिंग्यशीत्का।
ब रंमुखचुंबनम् कंठासक्तंपुनः कृत्वागाढालिंगनमाचरेत् २१ विधृत्यहस्तौजघ।
नोपपिष्टःशीत्कृत्यवक्त्रेच्चमुदाप्रचुंब्य भगेच्चलिंगंस्तनमर्दनंचदत्वापिकृत्वा।

३

प्रारमेच्चकामी २२ केतक्यग्रनखंकृत्वानखांस्त्रीन्मंचच्चैववा पार्श्वेचजघनेयो।
नौदत्वाकामीरमेत्स्त्रियम् २३ नखरोमांचितंकृत्वादंतेनाधरपीडनम् ग्रीवा।
मोकृष्यपत्नेनयोनौलिंगेनताडनम् २४ लिंगप्रवेशनंकृत्वाधृत्वागाढप्रयोगतः।
पार्श्वद्वयेनसंपीड्य निस्पृहंताडयेद्भगम् २५ समालिंग्यस्त्रियंगाढंस्तनयुग्मेच
मर्दनम् योनौनाभौचसंमर्द्यनिष्ठुरं लिंगताडनम् २६ केशेकरेणसंगृह्यद
ढंसंताडयेद्भगम् वदनेचुंबनंकृत्वाभगंहस्तेनमर्दयेत् २७ कुचंकरेणसंम

श्रीः र्धपीडयेदधरंदृढम् रमणंपद्मबंधेनपद्मिनीरतिमादिशेत् २८ शीत्कारंचुंबनं।
४ पीडागलेहस्तेच चुंबनम् क्षणेक्षणेस्तनेहस्तंचित्रिणीरतिमादिशेत् २९ स्त्री
पुंसयोस्तथान्योन्यंभगेलिंगेनचुंबनम् रमणंतुतथागाढंशंखिणीरतिमादि
शेत् ३० केशंकरेणसंगृह्यसुदृढंजाजबंधनम् भगंकरेणसंताड्यहस्ति।
णीरतिमादिशेत् ३१ कूर्मपृष्ठंगजस्कंधंपद्मगंधंसुगंधियत् अलोमकंसु
विस्तीर्णंपंचैतद्भगमुत्तमम् ३२ शीतलंनिम्नमत्युच्चंगोजिव्हासदृसंपरम्
४

इत्युक्तंकामशास्त्रेषुभगदोषचतुष्टयम् ३३ मुसलंवंशकंबीरंद्विविधंलिंगल
क्षणम् स्थूलंमुसलमित्युक्तंदीर्घंवंशककीरकम् ३४ स्त्रीजितोगायकश्चैव
नारीसत्यपरःसुखी षडंगुलशरीरश्चसश्रीमांशशको मतः ३५ श्रेष्ठस्तुधार्मि
कःश्रीमानसत्यवादीप्रियंवदः अष्टांगुलशरीरश्चरूपयुक्तोमृगोमतः ३६ उप
कारपरोनित्यंस्त्रीजितःश्लेष्मणःसुखी दशांगुलशरीरश्चमनस्वीवृषभोमतः
३७ काष्ठतुल्यवपुर्धृष्टोमिथ्यावाक्यश्चनिर्भयः द्वादशांगुललिंगश्चदरिद्रश्च

हयोमतः ३८ नरमंतेयदानार्योस्तस्यवारमवेच्चया नानावंधांस्तथावक्ष्येरंत।
व्याकामिभिः स्त्रियः ३९ पद्मासनोनागपादोलतावेष्टोर्द्धसंपुटः कुलिशः सुं।
दरश्चैवतथाकेसरसंज्ञकः ४० हिल्लोलोनरसिंहोपिविपरीतस्तथापरः क्षुब्धा
रोधेनुकश्चैवउत्कंठश्चततः परः सिंहासनोरतिर्नोगोविद्याधरस्तुषोडशः।
४१ हस्ताभ्यांचसमालिंग्यनारींपद्मासनोपरि रमेद्गाढंसमाकृष्यवंधोयंपद्म।
सनकः ४२ पादोस्कंधयुगेहस्तोक्षिपेल्लिंगंभगेलघु प्ररमेत्कामुकोनारींवं। ५

धोनागपदोमतः ४३ वाहुभ्यांपादयुग्माभ्यांवेष्टयित्वारमेत्स्त्रियम् लघुलिं
गंताडयेद्योनौलघुवेष्टोयमुच्यते ४४ स्त्रीपादावंतरिक्षेतुकिंचिदूर्द्ध्वोच्चजानु।
नि स्तनयोर्मर्दनंपीडावंधोयमर्द्धसंपुटः ४५ स्त्रीपादद्वयमास्फाल्यहठा।
ल्लिंगस्यताडनं योनिमापीडयेत्कामीवंधः कुलिशसं[redacted]स्तकः ४६ नारीपाद
द्वयंस्वामीधारयेद्हृदुद्देशतः कुचौधृत्वापिवेद्वक्त्रंवंधोयंरतिसुंदरः ४७ स्त्री
योजंघेसमापीड्यदोर्भ्यांगात्रस्यमर्दनं पुनः प्रपीडयेद्योनिंवंधः केसरसंज्ञ।

श्रीः कः ४८ हदिकृत्वास्त्रियः पादौकराभ्यांधारयेत् करौयथेष्टंताडयेद्योनिंवं।
६ धोहिल्लोलसंज्ञकः ४९ पादौसंपीड्ययोनौचहठाल्लिंगप्रवेशनं हस्तयोर्वे
ष्टनंगाढंवंधोनरसिंहसंज्ञकः ५० पादमेकमूरौकृत्वाद्वितीयंकटिसंस्थितम्
नारीञ्चसुरमेत्कामीविपरीतस्तुवंधकः ५१ पार्श्वोपरिपदौकृत्वायोनौलिं
गेनताडयेत् बाहुभ्यांताडयेद्गाढंसुदृढोवंधएवसः ५२ सुप्तांस्त्रियंसमा
लिंग्यस्वयंसुप्त्वारमेत्पुनः यल्लिंगंचालयेद्योनौवंधोयंधेनुकःस्मृतः ५३
६

नारीपादौचहस्तेनधारयेज्जलकेपुनः स्तनार्पितकरोकामीवंधश्चोत्कंठसंज्ञकः।
५४ स्वयंजंघाद्वयंकामीकृत्वायोषित्पदद्वयम् स्तनोधृत्वारमेत्कामीवंधःसिंहास
नोमतः ५५ पीडयेत्कुचयुग्मेन [redacted] कामुकःकामिनीयदि रतिर्नागःसमाख्यातःका।
मिनीनांमनोहरः ५६ नार्याश्चोरुयुगंधृत्वाकराभ्यांताडयेत्पुनः रमयेन्निर्भरं
कामीवंधोविद्याधरोमतः ५७ स्त्रियमानीययत्नेनविधृत्यचरणद्वयम् व
शंनयतियःकामीरतिशास्त्रविचक्षणः ५८ रतिशास्त्रंसमाकर्ण्यवंधाभूप

श्रीः आदिषोडश नानाविधरतिंकुर्यात्कामिनीकामुकोजनः ५९ सर्वशास्त्रार्थव
७ त्केणजयदेवेनधीमता। मंजरीरतिशास्त्रस्यकृतानीतासमाप्ताम् ६० इति। ता
श्रीजयदेवेनविरचितारतिमंजरीसमाप्ता। श्रीकृष्णचंद्रचरणारविंदार्पण
मस्तु॥ संपोष्यंसदपत्यवत्सरकराद्रक्ष्यंचसुक्षेत्रवत् संशोध्यंव्रणिनोंग।
वत्सतिदिनंनीक्ष्यंचसन्मित्रवत् बध्यंवध्यवदश्लथंनखलुविस्मर्यंहरे
नामवन्नैवंसीदतिपुस्तकंकिलकदाप्येतद्गुरूणांवचः १ गुरुनिकरक।

७

श्रीः टाक्षोपेक्षयास्वेच्छयावाकमलनयनकांताच्चिंतयानंतयावा। करणेकलित
८ कामाद्याधिनाव्याधिनावाकरकृतमपराधंक्षंतुमर्हंतिसंतः २ श्री विक्र।
मादित्यसंवत् १९४१ वैशाखशुक्लद्वितीयायांरविवासरेजयपुरेलि।
खितमिदंपुस्तकंमांगीलालशर्मणाश्रीरस्तु ॥ शुभमस्तु ॥ श्री ॥ श्री ॥

८